শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥ শ্রীমদ্ভগৱদ্গীতা ॥

## ॥ রাজৱিদ্যারাজগুহ্যযোগঃ ॥
(নৱমোধ্যাযঃ)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ রাজৱিদ্যারাজগুহ্যযোগঃ ॥
## (নৱমোধ্যাযঃ)

*শ্রীভগৱানুৱাচ*

ইদং তু তে গুহ্যতমং প্রৱক্ষ্যাম্যনসূযৱে।
জ্ঞানং ৱিজ্ঞানসহিতং যজ্জঞাত্বা মোক্ষ্যসেশুভাত্॥ ৯-১ ॥

রাজৱিদ্যা রাজগুহ্যং পৱিত্রমিদমুত্তমম্।
প্রত্যক্ষাৱগমং ধর্ম্যং সুসুখং কর্তুমৱ্যযম্॥ ৯-২ ॥

অশ্রদ্দধানাঃ পুরুষা ধর্মস্যাস্য পরন্তপ।
অপ্রাপ্য মাং নিৱর্তন্তে মৃত্যুসংসারৱর্ত্মনি॥ ৯-৩ ॥

মযা ততমিদং সর্ৱং জগদৱ্যক্তমূর্তিনা।
মতস্থানি সর্ৱভূতানি ন চাহং তেষ্ৱৱস্থিতঃ॥ ৯-৪ ॥

ন চ মতস্থানি ভূতানি পশ্য মে যোগমৈশ্বরম্।
ভূতভৃন্ন চ ভূতস্থো মমাত্মা ভূতভাৱনঃ॥ ৯-৫ ॥

যথাকাশস্থিতো নিত্যং ৱাযুঃ সর্ৱত্রগো মহান্।
তথা সর্ৱাণি ভূতানি মতস্থানীত্যুপধারয॥ ৯-৬ ॥

সর্ৱভূতানি কৌন্তেয প্রকৃতিং যান্তি মামিকাম্।
কল্পক্ষযে পুনস্তানি কল্পাদৌ ৱিসৃজাম্যহম্॥ ৯-৭ ॥

প্রকৃতিং স্বামৱষ্টভ্য ৱিসৃজামি পুনঃ পুনঃ।
ভূতগ্রামমিমং কৃতস্নমৱশং প্রকৃতেৱর্শাত্॥ ৯-৮ ॥

ন চ মাং তানি কর্মাণি নিবধ্নন্তি ধনঞ্জয।
উদাসীনৱদাসীনমসক্তং তেষু কর্মসু॥ ৯-৯ ॥

মযাধ্যক্ষেণ প্রকৃতিঃ সূযতে সচরাচরম্।
হেতুনানেন কৌন্তেয জগদ্বিপরিৱর্ততে॥ ৯-১০ ॥

অৱজানন্তি মাং মূঢা মানুষীং তনুমাশ্রিতম্।
পরং ভাৱমজানন্তো মম ভূতমহেশ্বরম্॥ ৯-১১ ॥

মোঘাশা মোঘকর্মাণো মোঘজ্ঞানা ৱিচেতসঃ।
রাক্ষসীমাসুরীং চৈৱ প্রকৃতিং মোহিনীং শ্রিতাঃ॥ ৯-১২ ॥

মহাত্মানস্তু মাং পার্থ দৈৱীং প্রকৃতিমাশ্রিতাঃ।
ভজন্ত্যনন্যমনসো জ্ঞাত্বা ভূতাদিমৱ্যযম্॥ ৯-১৩ ॥

সততং কীর্তযন্তো মাং যতন্তশ্চ দৃঢৱ্রতাঃ।
নমস্যন্তশ্চ মাং ভক্ত্যা নিত্যযুক্তা উপাসতে॥ ৯-১৪ ॥

জ্ঞানযজ্ঞেন চাপ্যন্যে যজন্তো মামুপাসতে।
একত্বেন পৃথক্ত্বেন বহুধা ৱিশ্বতোমুখম্॥ ৯-১৫ ॥

অহং ক্রতুরহং যজ্ঞঃ স্বধাহমহমৌষধম্।
মন্ত্রোহমহমেৱাজ্যমহমগ্নিরহং হুতম্॥ ৯-১৬ ॥

পিতাহমস্য জগতো মাতা ধাতা পিতামহঃ।
ৱেদ্যং পৱিত্রমোঙ্কার ঋক্সাম যজুরেৱ চ॥ ৯-১৭ ॥

গতির্ভর্তা প্রভুঃ সাক্ষী নিৱাসঃ শরণং সুহৃত্।
প্রভৱঃ প্রলযঃ স্থানং নিধানং বীজমৱ্যযম্॥ ৯-১৮ ॥

তপাম্যহমহং ৱর্ষং নিগৃহ্ণাম্যুতসৃজামি চ।
অমৃতং চৈৱ মৃত্যুশ্চ সদসচ্চাহমর্জুন॥ ৯-১৯ ॥

ত্রৈৱিদ্যা মাং সোমপাঃ পূতপাপা
    যজ্ঞৈরিষ্টৱা স্বর্গতিং প্রার্থযন্তে।
তে পুণ্যমাসাদ্য সুরেন্দ্রলোকং
    অশ্নন্তি দিৱ্যান্দিৱি দেৱভোগান্॥ ৯-২০ ॥

তে তং ভুক্ত্ৱা স্বর্গলোকং ৱিশালং
    ক্ষীণে পুণ্যে মর্ত্যলোকং ৱিশন্তি।
এৱং ত্রযীধর্মমনুপ্রপন্না
    গতাগতং কামকামা লভন্তে॥ ৯-২১ ॥

অনন্যাশ্চিন্তযন্তো মাং যে জনাঃ পৰ্যুপাসতে।
তেষাং নিত্যাভিযুক্তানাং যোগক্ষেমং ৱহাম্যহম্॥ ৯-২২ ॥

যেপ্যন্যদেৱতাভক্তা যজন্তে শ্ৰদ্ধযান্বিতাঃ।
তেপি মামেৱ কৌন্তেয যজন্ত্যৱিধিপূৰ্ৱকম্॥ ৯-২৩ ॥

অহং হি সৰ্ৱযজ্ঞানাং ভোক্তা চ প্ৰভুরেৱ চ।
ন তু মামভিজানন্তি তত্ত্বেনাতশ্চ্যৱন্তি তে॥ ৯-২৪ ॥

যান্তি দেৱৱ্ৰতা দেৱানপিতৃঋন্যান্তি পিতৃৱ্ৰতাঃ।
ভূতানি যান্তি ভূতেজ্যা যান্তি মদ্যাজিনোপি মাম্॥ ৯-২৫ ॥

পত্ৰং পুষ্পং ফলং তোযং যো মে ভক্ত্যা প্ৰযচ্ছতি।
তদহং ভক্ত্যুপহৃতমশ্নামি প্ৰযতাত্মনঃ॥ ৯-২৬ ॥

যতকরোষি যদশ্নাসি যজ্জুহোষি দদাসি যত্।
যত্তপস্যসি কৌন্তেয ততকুরুষৱ মদৰ্পণম্॥ ৯-২৭ ॥

শুভাশুভফলৈরেৱং মোক্ষ্যসে কৰ্মবন্ধনৈঃ।
সন্ন্যাসযোগযুক্তাত্মা ৱিমুক্তো মামুপৈষ্যসি॥ ৯-২৮ ॥

সমোহং সৰ্ৱভূতেষু ন মে দ্বেষ্যোস্তি ন প্ৰিযঃ।
যে ভজন্তি তু মাং ভক্ত্যা মযি তে তেষু চাপ্যহম্॥ ৯-২৯ ॥

অপি চেতসুদুরাচারো ভজতে মামনন্যভাক্।
সাধুরেৱ স মন্তৱ্যঃ সম্যগ্ব্যৱসিতো হি সঃ॥ ৯-৩০ ॥

ক্ষিপ্ৰং ভৱতি ধৰ্মাত্মা শশ্বচ্ছান্তিং নিগচ্ছতি।
কৌন্তেয প্ৰতিজানীহি ন মে ভক্তঃ প্ৰণশ্যতি॥ ৯-৩১ ॥

মাং হি পাৰ্থ ৱ্যপাশ্ৰিত্য যেপি স্যুঃ পাপযোনযঃ।
স্ত্ৰিযো ৱৈশ্যাস্তথা শূদ্ৰাস্তেপি যান্তি পরাং গতিম্॥ ৯-৩২ ॥

কিং পুনৰ্ব্ৰাহ্মণাঃ পুণ্যা ভক্তা রাজৰ্ষযস্তথা।
অনিত্যমসুখং লোকমিমং প্ৰাপ্য ভজস্ব মাম্॥ ৯-৩৩ ॥

মন্মনা ভৱ মদ্ভক্তো মদ্যাজী মাং নমস্কুরু।
মামেৱৈষ্যসি যুক্ত্ৱৈৱমাত্মানং মৎপরাযণঃ॥ ৯-৩৪ ॥

॥ ইতি শ্ৰীমদ্ভগৱদ্গীতাসূপনিষৎসু ব্ৰহ্মৱিদ্যাযাং যোগশাস্ত্ৰে
শ্ৰীকৃষ্ণার্জুনসংৱাদে রাজৱিদ্যারাজগুহ্যযোগো নাম নৱমোঽধ্যাযঃঽধ্যাযঃ ॥